श्रीभगवानुवाच
The Blessed Lord said,
śrī-bhagavān uvāca

भूय एव महाबाहो
Once again, O Arjuna,
bhūya eva mahā-bāho

शृणु मे परमं वचः ।
listen to My supreme words
śṛṇu me paramaṁ vacaḥ

यत्तेऽहं प्रीयमाणाय
which I, unto you who are dear,
yat te ’haṁ prīyamāṇāya

वक्ष्यामि हितकाम्यया ।।१।।
will tell for your benefit.
vakṣyāmi hita-kāmyayā

न मे विदुः सुरगणाः
The gods do not know My
na me viduḥ sura-gaṇāḥ

प्रभवं न महर्षयः ।
origin, nor do the great sages.
prabhavaṁ na maharṣayaḥ

अहमादिर्हि देवानां
I indeed am the source of the gods
aham ādir hi devānāṁ

महर्षीणां च सर्वशः ।।२।।
and the great sages, all of them.
maharṣīṇāṁ ca sarvaśaḥ

यो मामजमनादिं च
One who knows Me – the unborn, beginningless,
yo mām ajam anādiṁ ca

वेत्ति लोकमहेश्वरम् ।
Lord of the world –
vetti loka-maheśvaram

असम्मूढः स मर्त्येषु
he is undeluded among mortals
asammūḍhaḥ sa martyeṣu

सर्वपापैः प्रमुच्यते ।।३।।
and freed from all sins.
sarva-pāpaiḥ pramucyate

बुद्धिर्ज्ञानमसम्मोहः
Intelligence, knowledge, absence of delusion,
buddhir jñānam asammohaḥ

क्षमा सत्यं दमः शमः ।
patience, truth, self-control, tranquility
kṣamā satyaṁ damaḥ śamaḥ

सुखं दुःखं भवोऽभावो
happiness, suffering, birth, death,
sukhaṁ duḥkhaṁ bhavo ’bhāvo

भयं चाभयमेव च ॥४॥
fear and fearlessness ...
bhayaṁ cābhayam eva ca

अहिंसा समता तुष्टिस्
... harmlessness, impartiality, contentment,
ahiṁsā samatā tuṣṭis

तपो दानं यशोऽयशः ।
austerity, charity, fame, infamy –
tapo dānaṁ yaśo ’yaśaḥ

भवन्ति भावा भूतानां
these attributes of beings arise
bhavanti bhāvā bhūtānāṁ

मत्त एव पृथग्विधाः ॥५॥
variously from Me alone.
matta eva pṛthag-vidhāḥ

महर्षयः सप्त पूर्वे
The original seven great sages
maharṣayaḥ sapta pūrve

चत्वारो मनवस्तथा ।
and the four projenitors
catvāro manavas tathā

मद्भावा मानसा जाता
were born from Me, from My mind –
mad-bhāvā mānasā jātā

येषां लोक इमाः प्रजाः ॥६॥
those from whom the world's people arose.
yeṣāṁ loka imāḥ prajāḥ

एतां विभूतिं योगं च
This glory and power
etāṁ vibhūtiṁ yogaṁ ca

मम यो वेत्ति तत्त्वतः ।
of Mine – one who knows it truly
mama yo vetti tattvataḥ

सोऽविकल्पेन योगेन
through steadfast yoga
so ’vikalpena yogena

युज्यते नात्र संशयः ॥७॥
is certainly united with Me.
yujyate nātra saṁśayaḥ

अहं सर्वस्य प्रभवो
I am the origin of all.
ahaṁ sarvasya prabhavo

मत्तः सर्वं प्रवर्तते ।
From Me, everything arose.
mattaḥ sarvaṁ pravartate

इति मत्वा भजन्ते मां
Knowing thus, they worship Me –
iti matvā bhajante māṁ

बुधा भावसमन्विताः ॥८॥
those who are wise and meditative.
budhā bhāva-samanvitāḥ

मच्चित्ता मद्गतप्राणा
Those who think of Me, live for Me,
mac-cittā mad-gata-prāṇā

बोधयन्तः परस्परम् ।
teaching one another,
bodhayantaḥ parasparam

कथयन्तश्च मां नित्यं
always speaking of Me,
kathayantaś ca māṁ nityaṁ

तुष्यन्ति च रमन्ति च ॥९॥
they are content and joyful.
tuṣyanti ca ramanti ca

तेषां सततयुक्तानां
For those who are always steadfast,
teṣāṁ satata-yuktānāṁ

भजतां प्रीतिपूर्वकम् ।
worshiping with love,
bhajatāṁ prīti-pūrvakam

ददामि बुद्धियोगं तं
I give them that knowledge
dadāmi buddhi-yogaṁ taṁ

येन मामुपयान्ति ते ॥१०॥
by which they come to Me.
yena mām upayānti te

तेषामेवानुकम्पार्थम
Out of compassion for them,
teṣām evānukampārtham

अहमज्ञानजं तमः ।
the darkness of ignorance
aham ajñānajaṁ tamaḥ

नाशयाम्यात्मभावस्थो
I destroy, dwelling within,
nāśayāmy ātma-bhāvastho

ज्ञानदीपेन भास्वता ॥११॥
with the shining lamp of knowledge.
jñāna-dīpena bhāsvatā

अर्जुन उवाच
Arjuna said,
arjuna uvāca

परं ब्रह्म परं धाम
Supreme brahman, supreme abode,
paraṁ brahma paraṁ dhāma

पवित्रं परमं भवान् ।
supreme purifier – You are
pavitraṁ paramaṁ bhavān

पुरुषं शाश्वतं दिव्यम
the eternal divine being,
puruṣaṁ śāśvataṁ divyam

आदिदेवमजं विभुम् ।।१२।।
foremost God, unborn and all-pervasive.
ādi-devam ajaṁ vibhum

आहुस्त्वामृषयः सर्वे
Thus all the sages call You,
āhus tvām ṛṣayaḥ sarve

देवर्षिर्नारदस्तथा ।
along with the divine sages – Narada,
devarṣir nāradas tathā

असितो देवलो व्यासः
Asita, Devala, and Vyasa.
asito devalo vyāsaḥ

स्वयं चैव ब्रवीषि मे ।।१३।।
And You Yourself tell me.
svayaṁ caiva bravīṣi me

सर्वमेतद् ऋतं मन्ये
All this I accept as true
sarvam etad ṛtaṁ manye

यन्मां वदसि केशव ।
which You have told me, O Krishna.
yan māṁ vadasi keśava

न हि ते भगवन् व्यक्तिं
Lord, Your manifestation
na hi te bhagavan vyaktiṁ

विदुर्देवा न दानवाः ।।१४।।
the gods and demons do not know.
vidur devā na dānavāḥ

स्वयमेवात्मनात्मानं
You Yourself, by Yourself,
svayam evātmanātmānaṁ

वेत्थ त्वं पुरुषोत्तम ।
know Yourself, O Highest Being,
vettha tvaṁ puruṣottama

भूतभावन भूतेश
O Creator, O Lord of Creatures,
bhūta-bhāvana bhūteśa

देवदेव जगत्पते ॥१५॥
O God of Gods, O Lord of the World.
deva-deva jagat-pate

वक्तुमर्हस्यशेषेण
Please describe completely
vaktum arhasy aśeṣeṇa

दिव्या ह्यात्मविभूतयः ।
Your divine glories,
divyā hy ātma-vibhūtayaḥ

याभिर्विभूतिभिर्लोकान्
the glories with which the worlds
yābhir vibhūtibhir lokān

इमांस्त्वं व्याप्य तिष्ठसि ॥१६॥
You pervade and abide therein.
imāṁs tvaṁ vyāpya tiṣṭhasi

कथं विद्यामहं योगिंस्
O Yogi, how can I know
kathaṁ vidyām ahaṁ yogiṁs

त्वां सदा परिचिन्तयन् ।
You, thinking about You always?
tvāṁ sadā paricintayan

केषु केषु च भावेषु
In what forms
keṣu keṣu ca bhāveṣu

चिन्त्योऽसि भगवन्मया ॥१७॥
are You to be contemplated by me, O Lord?
cintyo ’si bhagavan mayā

विस्तरेणात्मनो योगं
Extensively, of Your power
vistareṇātmano yogaṁ

विभूतिं च जनार्दन ।
and glory, O Krishna,
vibhūtiṁ ca janārdana

भूयः कथय तृप्तिर्हि
tell me again, because
bhūyaḥ kathaya tṛptir hi

शृण्वतो नास्ति मेऽमृतम् ॥१८॥
hearing Your sweet words, I am not yet satisfied.
śṛṇvato nāsti me ’mṛtam

श्रीभगवानुवाच
The Blessed Lord said,
śrī-bhagavān uvāca

हन्त ते कथयिष्यामि
Oh! I will tell you
hanta te kathayiṣyāmi

दिव्या ह्यात्मविभूतयः ।
My divine glories
divyā hy ātma-vibhūtayaḥ

प्राधान्यतः कुरुश्रेष्ठ
which are most prominent,
prādhānyataḥ kuru-śreṣṭha

नास्त्यन्तो विस्तरस्य मे ।।१९।।
for there is no limit to My extent.
nāsty anto vistarasya me

अहमात्मा गुडाकेश
O Arjuna, I am the self
aham ātmā guḍākeśa

सर्वभूताशयस्थितः ।
abiding within all beings.
sarva-bhūtāśaya-sthitaḥ

अहमादिश्च मध्यं च
I am the beginning, middle,
aham ādiś ca madhyaṁ ca

भूतानामन्त एव च ।।२०।।
and end for all beings.
bhūtānām anta eva ca

आदित्यानामहं विष्णुर्
Among the Adityas, I am Vishnu.
ādityānām ahaṁ viṣṇur

ज्योतिषां रविरंशुमान् ।
Among lights, I am the shining sun.
jyotiṣāṁ ravir aṁśumān

मरीचिर्मरुतामस्मि
Among the Maruts, I am Marici.
marīcir marutām asmi

नक्षत्राणामहं शशी ।।२१।।
Among the stars, I am the moon.
nakṣatrāṇām ahaṁ śaśī

वेदानां सामवेदोऽस्मि
Among the Vedas, I am the Sama Veda.
vedānāṁ sāma-vedo 'smi

देवानामस्मि वासवः ।
Among the gods, I am the Vasus.
devānām asmi vāsavaḥ

इन्द्रियाणां मनश्चास्मि
Among the senses, I am the mind.
indriyāṇāṁ manaś cāsmi

भूतानामस्मि चेतना ।।२२।।
For beings, I am consciousness.
bhūtānām asmi cetanā

रुद्राणां शङ्करश्चास्मि
Among the Rudras, I am Shankara.
rudrāṇāṁ śaṅkaraś cāsmi

वित्तेशो यक्षरक्षसाम् ।
Among the spirits, I am the Lord of wealth.
vitteśo yakṣa-rakṣasām

वसूनां पावकश्चास्मि
Among the Vasus, I am Pavaka.
vasūnāṁ pāvakaś cāsmi

मेरुः शिखरिणामहम् ।।२३।।
Among mountains, I am Meru.
meruḥ śikhariṇām aham

पुरोधसां च मुख्यं मां
Among priests, as the main priest
purodhasāṁ ca mukhyaṁ māṁ

विद्धि पार्थ बृहस्पतिम् ।
Brihaspati, know Me, O Arjuna.
viddhi pārtha bṛhaspatim

सेनानीनामहं स्कन्दः
Among warriors, I am Skanda.
senānīnām ahaṁ skandaḥ

सरसामस्मि सागरः ।।२४।।
Among the waters, I am the sea.
sarasām asmi sāgaraḥ

महर्षीणां भृगुर् अहं
Among great sages, I am Bhrigu.
maharṣīṇāṁ bhṛgur ahaṁ

गिरामस्म्येकमक्षरम् ।
Among words, I am the one syllable (om).
girām asmy ekam akṣaram

यज्ञानां जपयज्ञोऽस्मि
Among sacrifices, I am japa.
yajñānāṁ japa-yajño 'smi

स्थावराणां हिमालयः ।।२५।।
Among the unmoving, I am the Himalayas.
sthāvarāṇāṁ himālayaḥ

अश्वत्थः सर्ववृक्षाणां
Among all trees, I am the Ashvattha.
aśvatthaḥ sarva-vṛkṣāṇāṁ

देवर्षीणां च नारदः ।
Among the divine sages, I am Narada.
devarṣīṇāṁ ca nāradaḥ

गन्धर्वाणां चित्ररथः
Among the Gandharvas, I am Citraratha.
gandharvāṇāṁ citrarathaḥ

सिद्धानां कपिलो मुनिः ।।२६।।
Among the siddhas, I am the sage Kapila.
siddhānāṁ kapilo muniḥ

उच्चैःश्रवसमश्वानां
Among horses, as Uccaishravas,
uccaiḥśravasam aśvānāṁ

विद्धि माममृतोद्भवम् ।
born of nectar, know Me.
viddhi mām amṛtodbhavam

ऐरावतं गजेन्द्राणां
Among great elephants, I am Airavata.
airāvataṁ gajendrāṇāṁ

नराणां च नराधिपम् ।।२७।।
Among men, I am king.
narāṇāṁ ca narādhipam

आयुधानामहं वज्रं
Among weapons, I am the thunderbolt.
āyudhānām ahaṁ vajraṁ

धेनूनामस्मि कामधुक् ।
Among cows, I am the wish-fulfilling cow.
dhenūnām asmi kāmadhuk

प्रजनश्चास्मि कन्दर्पः
Among procreators, I am Kandarpa.
prajanaś cāsmi kandarpaḥ

सर्पाणामस्मि वासुकिः ।।२८।।
Among snakes, I am Vasuki.
sarpāṇām asmi vāsukiḥ

अनन्तश्चास्मि नागानां
Among serpents, I am Ananta.
anantaś cāsmi nāgānāṁ

वरुणो यादसामहम् ।
Among the waters, I am Varuna.
varuṇo yādasām aham

पितॄणामर्यमा चास्मि
Among the ancestors, I am Aryama.
pitṝṇām aryamā cāsmi

यमः संयमतामहम् ।।२९।।
Among subjugators, I am Yama.
yamaḥ saṁyamatām aham

प्रह्लादश्चास्मि दैत्यानां
Among the Daityas, I am Prahlada.
prahlādaś cāsmi daityānāṁ

कालः कलयतामहम् ।
Among those who reckon, I am time.
kālaḥ kalayatām aham

मृगाणां च मृगेन्द्रोऽहं
Among animals, I am the lion.
mṛgāṇāṁ ca mṛgendro ’haṁ

वैनतेयश्च पक्षिणाम् ॥३०॥
Among birds, I am Garuda.
vainateyaś ca pakṣiṇām

पवनः पवतामस्मि
Among purifiers, I am wind.
pavanaḥ pavatām asmi

रामः शस्त्रभृतामहम् ।
Among bearers of weapons, I am Rama.
rāmaḥ śastra-bhṛtām aham

झषाणां मकरश्चास्मि
Among fish, I am the crocodile.
jhaṣāṇāṁ makaraś cāsmi

स्रोतसामस्मि जाह्नवी ॥३१॥
Among rivers, I am the Ganga.
srotasām asmi jāhnavī

सर्गाणामादिरन्तश्च
For this creation, the beginning, end,
sargāṇām ādir antaś ca

मध्यं चैवाहमर्जुन ।
and middle am I, O Arjuna.
madhyaṁ caivāham arjuna

अध्यात्मविद्या विद्यानां
Among knowledge, I am self-knowledge.
adhyātma-vidyā vidyānāṁ

वादः प्रवदतामहम् ॥३२॥
Of those who speak, I am speech.
vādaḥ pravadatām aham

अक्षराणां अकारोऽस्मि
Among letters, I am "a."
akṣarāṇāṁ a-kāro ’smi

द्वन्द्वः सामासिकस्य च ।
Among compound words, I am the dvandva.
dvandvaḥ sāmāsikasya ca

अहमेवाक्षयः कालो
I am immutable time.
aham evākṣayaḥ kālo

धाताहं विश्वतोमुखः ॥३३॥
I am the omniscient creator.
dhātāhaṁ viśvato-mukhaḥ

मृत्युः सर्वहरश्चाहम्
Death, the destroyer of all, am I.
mṛtyuḥ sarva-haraś cāham

उद्भवश्च भविष्यताम् ।
For future beings, I am their origin.
udbhavaś ca bhaviṣyatām

कीर्तिः श्रीर्वाक् च नारीणां
Among the feminine, I am fame, wealth, speech,
kīrtiḥ śrīr vāk ca nārīṇāṁ

स्मृतिर्मेधा धृतिः क्षमा ॥३४॥
memory, intelligence, courage, and patience.
smṛtir medhā dhṛtiḥ kṣamā

बृहत्साम तथा साम्नां
Among chants, I am the Brihatsaman.
bṛhat-sāma tathā sāmnāṁ

गायत्री छन्दसामहम् ।
Among poetic meters, I am the Gayatri.
gāyatrī chandasām aham

मासानां मार्गशीर्षोऽहम्
Among months, I am Margashirsha.
māsānāṁ mārga-śīrṣo ’ham

ऋतूनां कुसुमाकरः ॥३५॥
Among seasons, I am spring.
ṛtūnāṁ kusumākaraḥ

द्यूतं छलयतामस्मि
Among deceptions, I am gambling.
dyūtaṁ chalayatām asmi

तेजस्तेजस्विनामहम् ।
The brilliance of the bright am I.
tejas tejasvinām aham

जयोऽस्मि व्यवसायोऽस्मि
Victory am I. Effort am I.
jayo ’smi vyavasāyo ’smi

सत्त्वं सत्त्ववतामहम् ॥३६॥
The goodness of the good am I.
sattvaṁ sattvavatām aham

वृष्णीनां वासुदेवोऽस्मि
Among the Vrishnis, I am Krishna.
vṛṣṇīnāṁ vāsudevo ’smi

पाण्डवानां धनञ्जयः ।
Among the Pandavas, I am Arjuna.
pāṇḍavānāṁ dhanañjayaḥ

मुनीनामप्यहं व्यासः
Among the sages, I am Vyasa.
munīnām apy ahaṁ vyāsaḥ

कवीनामुशना कविः ॥३७॥
Among poets, I am the poet Ushana.
kavīnām uśanā kaviḥ

दण्डो दमयतामस्मि
For those who rule, I am punishment.
daṇḍo damayatām asmi

नीतिरस्मि जिगीषताम् ।
For those desiring victory, I am the law.
nītir asmi jigīṣatām

मौनं चैवास्मि गुह्यानां
I am the silence of secrets.
maunaṁ caivāsmi guhyānāṁ

ज्ञानं ज्ञानवतामहम् ॥३८॥
I am the wisdom of the wise.
jñānaṁ jñānavatām aham

यच्चापि सर्वभूतानां
And for all beings,
yac cāpi sarva-bhūtānāṁ

बीजं तदहमर्जुन ।
I am the seed, O Arjuna.
bījaṁ tad aham arjuna

न तदस्ति विना यत्स्यान्
Without Me, there could not exist
na tad asti vinā yat syān

मया भूतं चराचरम् ॥३९॥
any being, sentient or insentient.
mayā bhūtaṁ carācaram

नान्तोऽस्ति मम दिव्यानां
There is no limit to My divine
nānto ’sti mama divyānāṁ

विभूतीनां परन्तप ।
glories, O Arjuna.
vibhūtīnāṁ parantapa

एष तूद्देशतः प्रोक्तो
This much was described as an example
eṣa tūddeśataḥ prokto

विभूतेर्विस्तरो मया ॥४०॥
of My extensive glories.
vibhūter vistaro mayā

यद्यद्विभूतिमत् सत्त्वं
Whatever glories exist,
yad yad vibhūtimat sattvaṁ

श्रीमदूर्जितमेव वा ।
valuable or powerful indeed,
śrīmad ūrjitam eva vā

तत्तदेवावगच्छ त्वं
you should understand that they
tat tad evāvagaccha tvaṁ

मम तेजोऽंशसम्भवम् ॥४१॥
arise from a fraction of My splendor.
mama tejo’ṁśa-sambhavam

अथवा बहुनैतेन

But all this elaborate

athavā bahunaitena

किं ज्ञातेन तवार्जुन ।

description, what is it to you, O Arjuna?

kiṁ jñātena tavārjuna

विष्टभ्याहमिदं कृत्स्नम्

I support this entire universe

viṣṭabhyāham idaṁ kṛtsnam

एकांशेन स्थितो जगत् ॥४२॥

with just a fraction of Myself.

ekāṁśena sthito jagat